…त्यां कुंभकर्णंच भीमंच वाडवानलम्
भोजनांते स्मरेन्नित्यं कुक्षिरोगो न बाधते ।
पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।।
शंनो मित्रः शंवरुणः शंनो भवत्वर्यमा
शंन इंद्रो बृहस्पतिः शंनो विष्णुरुरुक्रमः ।
नमो ब्रह्मणे नमो वायवे नमस्ते वायो त्वमेव प्रत्यक्षब्रह्मा
त्वमेव प्रत्यक्षंब्रह्म वदिष्यामि ऋतं वदिष्यामि सत्यं वदिष्या
तन्मामवतु, तद्वक्तारमवतु, अवतु मां, अवतु वक्तारं शान्तिः ३ ।
सहनाववतु, सहनौभुनक्तु, सहवीर्यं करवावहै तेजस्विनौ
वधीतमस्तु माविद्विषावहै शांतिः ३ ।। ।। ।।
शंनोमित्रः शंवरुणः शंनोऽस्त्वर्यमा, शंन इंद्रश्चाग्निश्च
शंनो विष्णुरुरुक्रमः, नमो ब्रह्मणे नमो वायवे, नमस्ते
वायो त्वमेव प्रत्यक्षं ब्रह्मासि, त्वमेव प्रत्यक्षं ब्रह्मावा
दिषं, ऋतमवादिषं, सत्यमवादिषं, तन्मामावीत्
तद्वक्तारमावीत्, आवीन्मां, आवीद्वक्तारं
शांतिः ३ ।। सहनाववतु सहनौभुनक्तु सहवी
र्यं करवावहै तेजस्विनावधीतमस्तु माविद्विषावहै

यउदगात्पुरस्तात् हतोऽर्णवात् । विभ्राजमानः

सरिरस्यमध्ये, सम्मा वटषभो रोहिताक्षः सूर्यो

विपश्चिन्मनसा पुनातु, यद्ब्रह्मावादिषम् तन्मा माहि

सीत् सूर्यायविभ्राजायवै नमो नमः ॥ ॥

यज्ञेन यज्ञ यजंत देवास्तानि धर्माणि प्रथमान्यास न्

ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः संति देवाः

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः

स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥

स्वस्तिन इन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः ।

स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु

नः प्रजां जनयतु प्रजापतिर्धाता दधातु

नस्सुमनसः । संवत्सर ऋतुभिश्चाक्लृपाने

मयि पुष्टिं पुष्टिपति र्दधातु ॥ इति भो

नत्तारं पंच ॥ ८ ॥ ८

अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ

क ख ग घ ङ। च छ ज झ ञ।

प फ ब भ म। य र ल व।

क का कि की कु कू के कै

अ आ इ ई उ ऊ ए ऐ

१ २ ३ ४ ५ ६ ७ ८ ९ १०

ए ऐ अं अः॥
ओ औ अं अः॥

ट ठ ड ढ ण। त थ द ध न॥
ट ठ ड ढ ण। त थ द ध न॥

स ष भ द ह:॥
श ष स ह क्ष:॥

के कै कं कः॥
के कै कं कः॥

को कौ कं कः।
ओ औ अं अः।

११ १२ १३ १४ १५ १६ १७ १८ १९ २०
[illegible]

१	२	३	४	५	६	७	८	९	१०
੧	੨	੩	੪	੫	੬	੭	੮	੯	੧੦
۱	۲	۳	۴	۵	۶	۷	۸	۹	۱۰
1	2	3	4	5	6	7	8	9	10

ਰਿ ਮੁ ਸ੍ਰੁ ਅਿ ਨ੍ਹੂੰ ॥	क ख ग घ ङ ॥
ਸੁ ਸ੍ਰੁ ਤੁ ਾਂ ॥	च छ ज झ ञ ॥
ਤੁ ਤੂ ਧ ਏ ॥	ट ठ ड ढ ण ॥
ਤ੍ਰ ਤ੍ਰਿ ਨ ਨ ॥	त थ द ध न ॥
ਤ ਨਾ ਸੰ ਤਃ ॥	प फ ब भ म ॥
	य र ल व ॥ श ष स ह ॥

क का कि की कु कू के कै को कौ कं कः ॥

ਸ ਸੁ ਓ ਓਂ ੳ ਤ ਨ ਨ ਨ ਨਾ ਸੰ ਸਃ

श्रीः

ॐ तत्सदोम्॥

ॐ ब्रह्मानंदं परमसुखदं केवलं ज्ञानमूर्तिं।
द्वंद्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम्।
एकं नित्यं विमलमचलं सर्वदा साक्षिभूतं।
भावातीतं त्रिगुणरहितं सद्गुरुं त्वां नमामि॥ ॥ १

करचरणकृतं वा कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वापराधम्
विदितमविदितं वा सर्वमेतत् क्षमस्व
जय जय करुणाब्धे श्री महादेव शम्भो॥ २

नाथं त्रिभुवननाथं भूतिसितं त्रिनयनं
त्रिशूलधरम् उपवीतीकृतभोगिन —
मिन्दुकलाशेखरं वंदे॥ ॥३॥३॥ ३

श्रीः

ॐ नमो गुरवे ॥

ॐ नमामि सद्गुरुं शान्तं प्रत्यक्षं शिवरूपिणम् ।
शिरसा योगपीठस्थं धर्मकामार्थसिद्धये ॥
श्रीगुरुं परमानंदं वंदाम्यानंदविग्रहम् ।
यस्य सान्निध्यमात्रेण चिदानंदायते परम् ॥
अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥
अखंडमंडलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुः साक्षान्महेश्वरः ।
गुरुरेव जगत्सर्वं तस्मै श्रीगुरवे नमः ॥
नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे ।
श्री. गु. १ विद्यावतारसंसिद्ध्यै स्वीकृतानेकविग्रह ॥
नवाय नवरूपाय परमार्थैकरूपिणे ।
सर्वाज्ञानतमोभेदभानवे चिद्घनाय ते ॥

स्वतंत्राय दयाक्लृप्त विग्रहाय परात्मने ।
परतंत्राय भक्तानां भव्यानां भव्यरूपिणे ॥
ज्ञानिनां ज्ञानरूपाय प्रकाशाय प्रकाशिनां ।
विवेकिनां विवेकाय विमर्शाय विमर्शिनाम् ॥
पुरस्तात्पार्श्वयोः पृष्ठे नमस्कुर्यां मुपर्यधः ।
सदा सच्चित्तरूपेण विधेहि भवदासनम् ॥ ॥
अनाद्यायाखिलाद्याय मायिनेगतमायिने ।
अरूपाय सरूपाय शिवाय गुरवे नमः ॥
यो गुरुः स शिवः प्रोक्तो यः शिवः स गुरुः स्मृतः ।
उभयोरन्तरं नास्ति गुरोरपि शिवस्य च ॥
शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन ।
गुरुसेवाप्लवेनैव भवाब्धिं संतरिष्यति ॥
गुरवे नमः । परमगुरवे नमः । परमेष्ठिगुरवे नमः
परमाचार्याय नमः । आदिसिद्धेभ्यो नमः ॥ ॥ ॥

ओंम्

ॐ नमो गुरवे शिवाय ॥ नमो गणेशाय ॥
यः सर्वात्माऽखिलजनविभुर्देवदेवो महे-
शः स्वातंत्र्यस्थो ध्रुवपदगतो निष्क-
लात्मा वरेण्यः । विश्वोत्तीर्णो भवभय-
हरः स्वेच्छया विश्वपूर्ण स्तं श्रीरामं
त्रिभुवनगुरुं स्वात्मरूपं नमामि ॥ १
यस्मादीशान्प्रसरति शिवतत्त्वप्रभृति-
न्यान्ते विश्वमेतत्परमवपुषा स्थीयते
येन सम्यक् । यस्मिंस्तोयमिव क्रमत-
या लीयते वारिराशौ । तं श्रीरामं० २
ब्राह्मीं मूर्तिं भुवनजनने राजसीं यो-

ऽबिभर्ति तद्रक्षायां परमकृपया वैष्णवीं
सात्त्विकीं च। तत्संहारे ऽनलघृततनुस्ता-
मसीं रौद्रमूर्तिं तं श्रीरामं त्रिभुवन० ३
संसाराब्धौ विषयमकरे दुस्तरे संप्रमग्ना
उद्धृत्याऽस्मिन् परमदयया भेददृष्टिं
विच्छिद्य। ध्रौवं स्थानमचलममलं
प्रापिता येन भक्ताः तं श्रीरामं० ४
अस्मिंल्लोके हनुमन्नुऽन्वये यश्च मर्त्या-
ऽवतारमायाति स्म तिमिरहरणः
सज्जनानां हिताय। प्राकट्यार्थं स्वम-
तयशासः प्रेरितो रुद्रब्राते तं श्रीरामं० ५

सूर्ये प्राप्ते धनुषि च गुरौ तारकेशे तुला-
या माद्ये भौमे सुखगतबुधे प्राङ्गगे
भार्गवेऽपि। षष्ठे राहौ दशमसदने
सिंहलग्ने तु जातं तं श्रीरामं ॥ ६ ॥
मूर्त्या पूर्णः परमसुखदस्तेजसा द्वा-
दशात्मा प्रख्यातु शिशिरकिरणः
पावनश्चित्रभानुः। क्षौणीदीक्षागलित-
वृजिनै लक्ष्यते यश्च सद्भि तं श्रीरामं। ७
रूपं यस्य निखिलजगतां हृत्प्रमोदस्य
श्री: गु: २ हेतु यद्दन्तानां किरणपटलै व्याप्तवृन्दा
विशेषः व्याख्यानेन प्रहसितमुखः
कर्तनः संप्रायाणां तं श्रीरामं। ॥ ८ ॥

बाल्यादेव परमतपसि दुःसहे वर्तते
स्म विश्वमेतत्परममहिमा यश्च स्वात्म-
न्यऽद्राक्षीत् । स्वात्मानं च जगति नि-
खिले ज्ञानदृष्ट्या सदैव । तं श्रीरामं ।
यः शैवाख्यं परममृतं निर्गतं स्वा-
ऽऽनन्दाब्धात् तस्मादाज्ञाऽनुगतमनसो
भक्तवृन्दानऽमीप्सत् । देहमेतत् परि-
त्यज्य स्वऽगा क्वाश्वतं शैवधाम ।
तं श्रीरामं त्रिभुवनगुरुं स्वात्मरूपं नमामि ॥ १० ॥
इति श्री काश्मीरिक महामाहेश्वराचार्य
श्रीरामभट्टारकपादचरित्रं स्तुतिपूर्वकं शिवमस्तु ॥

१४५५०।

ॐ व्योमनन्दनववेदमिते साप्तर्षिके समे।
माघकृष्णाचतुर्दश्यां गुरौ दिवाकरोदये। १
मकरस्याथ संक्रान्तेः प्रथमे दिवसे
सति। व्यतीत्य षष्टिवर्षाणि ह्येक-
षष्टितमे शुभे॥ २ ॥ दिवाकरचन्द्रम-
सोः साम्यं तु गम्यमानयोः। अहो
श्रीरामभट्टोऽसौ गतः स्वं परमं पदम्॥ ३
शिष्या भक्ता वियोगात्ते दर्शनस्य दुः-
खाकुलाः। रोदमाणा गतस्थैर्या
श्री: गु: २ निर्मूला इव शाखिनः॥ ४ ॥
अहो मद्देशजनक त्वं गतोऽसीति-

वादिनः चातका इव जलदं नित्यं दर्शि-
नकांक्षिणः ॥ ५ ॥
अहो महेश्वर यथा पद्मच्छदा अकर्णिकाः
यथा शरद्वृक्षपर्णी गतानन्दश्रियः प्रभो ॥ ६ ॥
सूर्येन्दू न विनिष्क्रान्तौ निमग्नौ शोक-
सागरे । ज्ञानदीपस्य निर्वाणादज्ञा-
नेनाऽऽश्रितं जगत् ॥ ७ ॥
पूर्वार्केऽस्तं गते ग्रस्तं सर्वं काश्मीर-
मण्डलम् । अंधकाराऽसुरेन्द्रेण हा
कष्टं त्राहि मां विभो ॥ ८ ॥
रहस्यमार्गज्योत्स्नायां गतायामस्तं
तामसी । रात्रि र्विश्वगुपा याता
हा कष्टं त्राहि मां विभो ॥ ९ ॥

15

दयालो जगदार भक्तानुग्रहकारक।
अस्मद्धृत्कमले शम्भो तिष्ठ तिष्ठ
सदा प्रभो ॥ १० ॥

विद्याधरोऽयं भक्तस्ते त्वत्पादाम्बु-बु।
जषट्पदः। स्वामिन् सदा गत-
मोहो बोभूयात् त्वत्प्रसादतः ॥ ११ ॥

इति भक्तजनविलापः॥

॥ॐ॥ॐ॥ॐ॥

श्री·
गु·
४

ओ ३ म्

ॐ नमो भवान्यै ॥

ॐ नमो गणेशाय ॥ नमो गुरवे शिवाय ॥
ॐ यत्पादपद्मस्तवनेन प्रज्ञा विवर्धते
दन्दह्यते च पापम्। श्रीसद्गुरो मूर्तिं
दयासमुद्रां स्मरामि कालीं हृदि ध्या-
त्वयां ताम् ॥ १ ॥ यदंघ्रियुग्म-
स्मृतितीक्ष्णदात्रं लुनाति पापानिव
ग्राघ्यानिव जन्मपाशान्। श्रीसद्गु-
रोर्मूर्तिं दयासमुद्रां स्मरामि कालीं० ॥ २ ॥
यन्निर्मलाकीर्तिकुमारिका च छिन-
त्ति दुर्मानससंगवृक्षम्। श्रीसद्गुरो० ॥ ३ ॥
यन्नामरूपप्रविमर्शनेन विकल्पजा-
लं प्रविलीयतेऽन्तः। श्रीसद्गुरो० ॥ ४ ॥
यस्याः प्रसादार्कमयूखजालैः संफुल्ल-
ते हृत्कमलं समन्तात्, श्री० ॥ ५ ॥

यस्याः कटाक्षामृतदृष्टिपातै रेधन्त-
आनन्दसत्तरङ्गाः। श्रीसद्गुरो मूर्त्तिं
दयासमुद्रां स्मरामि कालीं हृदि च्या०। ६ ॥
चैतन्यरूपे परमामृताब्धौ स्पन्दात्म-
नि चोदितरङ्ग-मूर्तिः। या निःसर-
न्ती तु विवेकरूपा स्मरामि काली०। ७।
या चित्कला निर्गत्य विश्वरूपा पदा-
र्थवृन्दे निखिले समन्तात्। प्रकाशते
चैकस्वभावरूपा स्मरामि कालीं। ८।
अग्न्यर्कसोमैरपि न निवृत्तं यत्तम-
मो हार्दं प्रशान्तिमेति। यज्ज्यो-
तिषा सर्वप्रकाशकेन स्मरामि०। ९॥
या संविद्रूपा चिदचित्स्वभावा परा-
परा भेदतया विभिन्ना। विमर्श नि-

ह्नैरवलोकनीया स्मरामि कालीं । १० ।
परापश्यन्तीमध्यमादिभिर्या पंचाश-
दर्णानिव पुष्पगुच्छान् । लता प्रसूते-
ऽहंविमर्शरूपा स्मरामि कालीं । ११ ।
आदिं यथान्तं च गृहीतं यस्य मध्यं
स्वयं तस्य विगृह्यते हि । अहंपरा-
मर्शतनुस्तथा या स्मरामि कालीं । १२ ।
इच्छाक्रियाज्ञानस्वभावभूतं वेदत्रयं
यत्रविमर्शसारम् । अहंविमर्शैक-
स्वभावपूर्णां स्मरामि कालीं । १३ ।
जाग्रदवस्थादित्रयं तु सिक्थमिदं
यया तुर्यरसेन नित्यम् । तैलेन
वस्त्रमिव तुर्यरूपां स्मरामि कालीं । १४ ।

भवाऽभवाऽतिभव विश्वरूपा विश्वैकरूपा
तदतीतरूपा। शिवादिनित्यन्तविचि-
त्ररूपा स्मरामि कालीं हृदि चालयंतीं।।१५।
विमर्शसूत्रेण प्रगुंफितां ये तत्त्वात्
मालां स्वगलेऽर्पयन्ति। तैर्योगिभि-
रेव हि प्राप्यते या स्मरामि कालीं। ।१६।
चित्सूर्यदीप्तिररुणा प्रभाते हृत्-
स्कार रूपे च विभाव्यते या। वेद्यो-
न्मुखी भासनबद्धकक्षा स्मरामि। ।१७।
उद्भास्य वैचित्र्यं पदार्थवृन्दे चोद्भा-
सयन्ती मध्यधाम शुक्ला। चंडाति
दीप्तिरतिदुःसहा या स्मरामि। ।१८।

विलाप्य वेद्यं निखिलं स्वरूपे शिवैक्य-
भावमपि या प्रपन्ना। श्यामा हि संध्या-
ऽमृतसिंधुमग्ना। स्मरामि कालीं। १९॥
नदन्मुखहंसवराधिरूढा सरस्वती
चाखिलशाद्वभूमिः। सन्मानसाब्जाकर-
चारिणी या स्मरामि कालीं। २०।
या हंसयाना सततं सरन्ती चोर्ध्वं
करंध्रावधि मूलचक्रात्। विद्युल्लता
तत्र पुन र्विश्रान्ती स्मरामि कालीं। २१।
मृणालसूत्रसदृशी सुसूक्ष्मा या ब्रह्म
नाडी मध्यमातिगुप्ता। कालाग्निरी-
श्रि ग्रसितार्थजाता स्मरामि कालीं। २२।

सार्थ त्रिकोणात्मतया प्रवाह मार्गास्थि-
ता चाखिलनाडिभूमिः। संप्राप्यते
योगिभि र्हंसनिष्ठैः स्मरामि कालीं॰ ।१२३।
चंद्रार्कयो र्घस्मरयो रन्योन्य मुदा-
नवह्नौ समया विभाति। या योगि-
चित्ते त्रिभुवनस्वरूपा स्मरामि का॰ ।१२४।
ज्योतिरिति प्राह इति स्वरूपे त्यमे-
ति वर्णा इति वैखरीति। उद्दीप्यते
चेतसि योगिनां या॰ स्मरामि कालीं॰ ।१२५।
या चिद्रसा,,ख्यानतया विचित्रा [illegible]
श्री॰ घटादिरूपेण पृथग्विभाति। तत्तत्स्व
का॰
लु॰ रूपप्रतिपत्तिहेतुः स्मरामि कालीं ।१२६।

उच्चार मुद्राकरणादि मार्गातीता ह्यचमा-
नायासतयैव विश्वक्। प्रकाशते या
निखिलार्थजाते स्मरामि कालीं॰ ।२७।
उन्मेषमात्राद्भवते जगन्ति निमेषमा-
त्राद् ग्रसते तथा या। दृशा च पूर्णा-
नुभयस्वरूपा स्मरामि कालीं॰ ।२८।
कुलालमूर्तिरिव पद्मयोने रजःस्व-
भावा सृजति विचित्रम्। शक्तिर्जगत्-
स्थावरजङ्गमं या स्मरामि कालीं॰ ।२९।
नारायणी सत्त्वगुणस्वभावा जगदिदं
रक्षति जागरूका। रात्रिन्दिनं या
जननीव शक्तिः स्मरामि कालीं॰ ।३०।

कल्पान्तसूर्यस्य प्रभेव चंडा रुद्रस्य-
शक्तिरतिघोररूपा। सर्वमिदं या
कवलीकरोति स्मरामि कालीं। ।३१।
शंखासुरस्य हननेऽवतीर्णा जघान
तं प्राणिद्रुहं महास्या। मीनाकृति
दैत्यरिपुस्तुता या स्मरामि कालीं। ।३२।
कूर्माकृतिश्चोदधिमन्थने या बभार
पृष्ठे नगराजभारम्। देवैः स्तुता प्रा-
प्तमनोरथैस्सु स्मरामि कालीं। ।३३।
रसातले दैत्यनिमज्जितां या स्वदं
ष्ट्रया भूमिं समुज्जहार। वराहमूर्ति
र्ग्रसितासुरेन्द्रा स्मरामि कालीं। ।३४।

या नारसिंही दनुजेन्द्रप्राणाञ्छक्ति-
र्नखाग्रै र्विचकर्ष घोरा। प्रह्लादभक्तो
च बभूव तुष्टा स्मरामि कालीं॥ ६५।
निनाय पातालं बलिं छलेन पादत्र-
याक्रान्तपुरत्रया हि। नारायणी शक्ति-
र्दुःखहन्त्री स्मरामि कालीं॥ ६६।
त्रिसप्तकृत्वो हयतृवयं च राज्ञां क्षत्रि-
तिना भार्गवरामशक्तिः। चिच्छेद
या खण्डतनुश्च वंद्या स्मरामि॥ ६७।
या जानकी रामस्वरूपद्वारा मोहं-
ध्यमग्नानपि रावणादीन्। भस्मीच-
काराखिललोकवंद्या स्मरामि कालीं॥ ६८।

या कृष्णमूर्तिरपि दुष्टचित्तान् कंसा
दिदैत्येन्द्रवरान्जघान। ददौ च स्वं
शैवपदं सुधाम्ने स्मरामि काली॰।३९।
या बौद्धमूर्तिर्भुजगाधिसुप्ता संपा-
द्य कार्याणि बहूनि भूमेः। ज्ञानेव
ध्यानैर्हृदि भावनीया स्मरामि॰।४०।
या कल्किमूर्तिस्तु प्रचंडकाया स्तु-
द्राविनी दुष्टम्लेच्छ नाशिनी।
उन्मूलयन्ती दुर्जनद्रुमाणां स्मरामि॰।४१।
देवासुराणां च रणे पुरा या निःशुंभ
श्री॰ शुंभादि रिपून्-निहत्य। इन्द्राय
का॰
स्तु॰ राज्यं त्रिदिवस्य चादात्। स्मरामि॰।४२।

यस्याः प्रभावात् समरे हि जित्वा दुर्यो-
धनादीनपि दुष्टचित्तान्। प्राप्तं पर-
मैश्वर्यं पांडुपुत्रैः स्मरामि कालीं॥४३॥
यया कपालं विनिकृत्य पात्रीकृतं
हि पाणौ कमलासनस्य। मूलाग्र-
प्रोतौ मधुकामभ्रातृ स्मरामि का०॥४४॥
देवत्रयं वह्नित्रयं मुनीनां त्रयं त्रिलो-
की त्रिपदी त्रिब्रह्म। *त्र्यर्णं त्रिना-
डी त्रिपुरा यदाख्यं स्मरामि कालीं॥४५॥
पादाब्जयुग्मरजसः कणो यो पुनाति
लोकान् करुणार्द्रचित्ता। संप्रार्थनी-
ये संस्तूयमाना शिवविष्णुब्रह्मैः स्मरामि०॥४६॥

* त्र्याख्यायते या त्रिपुरेति त्र्यर्णी — इति पाठः

27

। ८ ।

यस्याः पद्मस्मरणेन ह्यद्धा स्वयं
त्रुटन्ति यतितस्य तीव्रे। कारागृहे
लोहमयाश्च पाशाः स्मरामि॰ । ४७ ।
या सिद्धलक्ष्मीरखिलार्थरूपिणी कामा-
त्मनां भक्तिमतां जनानाम्। ददाति
सिद्धिमखिलां यथार्हां स्मरामि॰। ४८।
या भक्तिलक्ष्मीरखिलार्थहृद्ये विरा-
गिणां भक्त्यतिशयभावात्। सतां
स्वरूपं प्रकटीकरोति स्मरामि॰। ४९॥
या मोक्षलक्ष्मीरपि मोक्षकामान्-
भक्तान् युनक्ति करुणार्द्रचित्ता। निर्वा-
णमार्गे भवपाशान्मुक्तान्। स्मरामि॰। ५०।

श्री॰
का॰
ल॰
१०

यस्याः प्रभावं भगवान् स्मरारि ब्रह्मा
हरिरिन्द्रमुनीन्द्रवाराय: । कल्पायुषा
न प्रभवन्ति वक्तुं, स्मरामि कालीं हृदि
ध्यालयां ताम् ॥ ५१ ॥ ॥ ॥ ॥
ॐ यस्याः प्रसादाद्विविधा म लब्धं,
स्वातंत्र्यदृत्तिश्च मयाद्य प्राप्ता ।
यस्याः प्रसादाद्भवबंधमुक्तां तां का-
लिकां श्रीगुरुमूर्तिं नौमि । ५२ ।
यस्याः प्रसादात् सदसद्विचार्य्य
सदेव प्राप्तं हृजि नेष्यथ्वं स्ति । द्वैतप्र-
था नाशमुपागताद्य, तां कालिकां
श्रीगुरुमूर्तिं नौमि ॥

भ्रान्त्वाच देशान्विविधान् पठित्वा बहूनि
शास्त्राणि न किंचित् प्राप्तम्।
लब्धः शिवः स्वात्मनि यत्प्रसादात्
तां कालिकां श्रीगु०।५४॥ दृष्टं ज-
गद्रूपतया स्वरूपं स्वात्मस्वरूपेण
जगच्च दृष्टम्। यस्याः प्रसादाद्गलि
ता च माया तां कालिकां श्रीगुरु०।५५।
अनुगृहीतः करुणाकटाक्षै र्देव्या
यया छेदितमायाबंधः। विद्याधर
श्चेतितचित्स्वरूप स्तां कालिकां०।५६।
यत्पादपद्मयुगलाग्रलसद्रजःप्र
संगाद्विमलो हि तस्मात्। विद्याधरः
सार्थकनामधेयस्तां कालिकां श्री-
गुरुमूर्तिं नौमि॥५७॥

श्री। का। ल। ॥

।स्तु।

एतां स्तुतिं यः पठेत् त्रिसंध्यं विविक्त-
देशे च समाहितात्मा। देव्याः प्रसादा-
दखिलांश्च कामान् भुक्त्वा परं यात्य-
ऽचलं स शैवम् ॥ ५८ ॥ ॥ ॥

कार्तिके पूर्णिमायां सुरगुरुदिवसे
नोदितोऽहं निशीथे चारिण्या हर-
कजान्तः प्रलयरविरुचा श्रीगुरो
रूपयेव। कान्त्यादेव्या स्तवेऽस्मिन्
स्वचरणयुगलधूलिभि र्बोधयित्वा
तस्मात् स्तोत्रं तयैव हृतमिदमन्य
था किं समर्थोऽहमस्मि ॥ ५९ ॥

रसाङ्क‍नन्दाब्धिमिते नु वत्सरे (४९९६)
सप्तर्षिके मार्गसितेतरे शुभे। भद्रा-
तिथौ (२) सौरदिनेऽम्बिकास्तुति
र्भूयादियं सौख्यकरी विविञ्चिता ॥ ६० ॥
इति श्री महाकालिकायाः स्तुतिः
शैवमार्गप्रकाशिका बोभूयात् ॥ ॥
कृतिरियं तत्रभवच्छ्रीमहामाहेश्वरा
चार्यवर्य स्वामिवरश्रीरामभट्टारका
श्री॰ पादपद्मोपजीविनो — राजानक-
१२ विद्याधरस्य — इति शिवमेवास्तु ॥ ॥

ॐ नमोः कालिकायै ॥

ॐ नमामि कालिकां देवीं महानकालि
का महाप्रभुः सर्वविभासिनीं ज्वालां महान-
दीमग्रज्वालिनीम् ॥ १ ॥ कालिके
त्वं जगन्माता कालिके त्वं जगत्पिता ।
कालिके त्वं जगद्बंधुः कालिकायै
नमोस्तुते ॥ २ ॥
कालमेघसमानाभा काली श्रीश्याम-
सुन्दरी । त्रिकालज्ञानजननी कालिका
प्रीयतां मम ॥ ३ ॥
सूर्यकोटिप्रतीकाशा चन्द्रकोटिसमा
नना अग्निकोटिसमघोरा कालिकाश्री । ४
चन्द्रार्कवह्निनयना तापत्रयविनाशि-
नी । मलत्रयापहर्त्री च । कालिकाश्री ॥ ५

चितिशक्तिः स्वतन्त्रा च पंचकृत्यविधा-
यिनी। विश्वाकारा विश्वोत्तीर्णा कालिका ॥ ६ ॥
* इडापिंगलयोर्मध्ये हंसवाहनचारि-
णी। विद्युद्रूपा सुसूक्ष्मा च कालिका ॥ ७ ॥
चिद्रसाध्यानभिन्ना च घटपटादिरू-
पिणी। सुवर्णजलवदेका कालिका ॥ ८ ॥
पुरत्रयाश्रया देवी त्रिपुरा त्रिपुरान्तका।
त्रिविदजननी विद्या कालिकाश्रीयतां ॥ ९ ॥
दाक्षायणी यज्ञहर्त्री सर्वदेवभयंकरी।
गोपिताकृतिरीशानी कालिकाश्रीयं ॥ १० ॥
हिमाद्रितनया गौरी तपसा तोषितेश्वरी।
त्रिजगज्जननी दुर्गा कालिकाश्रीं ॥ ११ ॥

* देवपितृपथोर्मध्ये इति पाठः ॥

नारायणी महालक्ष्मीः सर्वकामप्रदायि-
नी। त्रिसंध्या वैखरी धात्री कालिका० १२ ॥
अरिशंखकृपाणास्त्रिशूलपाशांकुशपा-
शिका। रक्तपात्रकराचैव कालिकाश्री०।१३।
चन्द्रार्धकृतचूडा च कपालमालधा-
रिणी। अट्टाट्टहासिनी भीमा कालिका०।१४।
प्रेतासनसमारूढा प्रेतभूमिविहारि-
णी। त्रिजगद्ग्रासिनी घोरा कालिका०।१५।
महाकालस्वरूपा च महाकालक्षय-
ङ्करी। महारौद्रीच चंडीच कालिकाश्री०।।१६।।
त्रिकोटिदेवजननी त्रिकोटिदेवनाशि-
नी। त्रिकोटिदेवतारूपा कालिकाश्री०।१७।

ॐ

ज्वालागुरवीस्वहूमाच महापातकना
शिनी। मोहांधकारशमनी कालि
का प्रीयतां मम ॥ १८ ॥

जयतु जयतु श्यामा कालमेघाव-
भासा। जयतु जयतु देवैः स्तूयमा
नपदाब्जा। जयतु जयतु योगि हृत-
कजाननिविष्टा। जयतु जयतु माता
कालिका कालहर्त्री ॥ १९ ॥ ॥

इति श्रीमहामाहेश्वराचार्यस्वामि
वर श्रीरामभट्टारकपादपद्मोपजी
विना राजानक विद्याधरेण कृता
कालिकास्तुतिः शिवप्रदा बोभवीतु ॥ ॥

ॐ नमो भवान्यै ।।

ॐ लीलारब्धस्थापितलुप्ताखिललोकां
लोकातीतैर्योगिभिरंतश्चिरमृग्याम्
बालादित्यश्रेणिसमानद्युतिपुंजां
गौरीमम्बामम्बोरुहाक्षीमहमीडे ।। १ ।।
प्राणायामाद्याकुलवृंदथानां (नाड्यंचि)
पादाम्भोजध्यानपराणां ऋहमाणाम्
ईक्षीमीक्षार्थीगहरंतामभरामां, गौरीमम्बां० ।। २ ।।
चंद्रापीडानंदितमंदस्मितवक्त्रां
चंद्रापीडालंकृतलोलालकभाराम्
इंद्रोपेंद्राद्यर्चितपादाम्बुजयुग्मां, गौरीमम्बां० ।। ३ ।।
प्रत्याहारध्यानसमाधिस्थितिभाजां
नित्यंचित्ते निर्वृत्तिकाष्ठांकलयन्तीम्
सत्यज्ञानानंदमयीं तां तनुमध्यां
गौरीमम्बामम्बोरुहाक्षीमहमीडे ।। ४ ।।

आदिक्षांतामक्षरमूर्त्या विलसंती
भूते भूते भूतकदंबप्रसवित्रीं
शब्दब्रह्मानंदमयीं तां तनुमध्यां। गौरीमम्बां ॥ ४ ॥
नानाकारैः शक्तिकदम्बैर्भुवनानि
व्याप्य स्वैरं क्रीडति या हु स्वयमेका
कल्याणीं तां कल्पलतामानतिभाजां। गौरीमंबां ॥ ५ ॥
यस्यामेतत्प्रोतमशेषं मणिमाला
सूत्रे यद्वत्क्वापि चरं चाप्यचरं च
तामध्यात्मज्ञानपदव्या गमनीयां, गौरीमंबां ॥ ६ ॥
यस्याः कुक्षौ लीनमखंडं जगदंडं
भूयो भूयः प्रादुरभूदक्षतमेव
पत्या सार्धं तां स्फटिकाद्रौ विहरंती, गौरीमंबां ॥ ७ ॥
मूलाधारादुत्थितवंतीं विधिरंध्रं
सौरं चांद्रं धाम विहाय ज्वलितांगीं
सव्यां सूक्ष्मां सूक्ष्मतनुं तां तडिदाभां, गौरीमं. ॥
नित्यः शुद्धो निष्कल एको जगदीशः
साक्षी यस्याः सर्गविधौ संहरणे च
विश्वत्राणक्रीडनलीलां शिवपत्नीं
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥ ९ ॥

प्रातः कालै भावविशुद्ध प्रणिधानात्
भक्त्यानित्यंजल्पति गौरीदशकं यः।
वाचां सिद्धिं सम्पदमुच्चैः शिवभक्तिं
तस्यावश्यं पर्वतपुत्री विदधाति ॥ ११॥
इतिश्री गौरीदशकं शुभकरं गौरी
भक्त्युद्रेकवर्धनंच बोभवीतुतराम् ॥ ~॥

34

39

ॐ

इदं पुस्तकं त्र्यालय नगर वासिन:

पंडित रूपराम सूनो नीलकंठ पंडितस्यास्ति,

इति परमेश्वर प्रसादादसौ नीलकंठ:

सहस्र वर्ष पर्यन्तं परमानन्द घनो बहु-

दायुष्मान् सरस्वती लक्ष्मी प्रसाद भाजनमपि

बोभूयात् ॥ १२०१६ । १९८४ ॥

स्वातंत्र्यात्मा राजमान स्वभावभि—

बोहर्यंतवी चिद्रसास्वादमत्त: ।

प्राक्के पीठे यामलेशिद्धिलुब्धो

महानंदो भैरवोहं भवोहम ॥

[illegible]

15

۴۵

باپاری پنڈت نیلہ کنٹھ جی بابو

-۱۹۸۲ - ۲۰۳۶ ~~[illegible]~~

...स्तु। अमृतापतां। नैवेद्यम्। सावित्राणि। सावित्रस्य।
देवस्य त्वा। सवितुः प्रसवे श्विनो। र्बाहुभ्यां। पूष्णो हस्ताभ्यां
आदधे। महागणपतये। कुमाराय। श्रियै। सरस्वत्यै। लक्ष्म्यै
विश्वकर्मणे। द्वारदेवताभ्यः प्रजापतये। ब्रह्मणे। कलश
देवताभ्यः। ब्रह्मविष्णुमहेश्वरदेवताभ्यः। चतुर्वेदेश्वराय।
सानुचराय। वास्तुपतये नारायणाय। दुर्गायै। त्र्यंबकाय।
वरुणाय। यज्ञपुरुषाय। अग्निप्राजादिभ्यः। पितृगणदेव
ताभ्यः॥ भगवते वासुदेवाय। लक्ष्मीसहिताय॥
भगवते भवाय देवाय। पार्वतीसहिताय॥
भगवते विनायकाय। वल्लभासहिताय॥
भगवते ह्रां ह्रीं सः सूर्याय। प्रभासहिताय॥
भगवत्यै उमायै। सहस्रनाम्न्यै। दुर्गादेव्यै भवान्यै॥
अभयंकरीदेव्यै भवान्यै। क्षेत्राधिपतये भैरवाय॥
इन्द्रादिभ्यो दशलोकपालेभ्यः॥ अनन्तादि
भ्यो अष्टाभ्यः कुलनागदेवताभ्यः। पंचपावादिग्रात
...नुष्यति देवताभ्यः। अखंडब्रह्मांडव्यापकदेवताभ्यः॥
...ादिभ्यः। वटुकादिभ्यः ॐ नमो नैवेद्यं निवेद
...नमः॥ । भगवते श्रीं क्लीं कृष्णाय॥

आकाशगामान्तेभ्यो ऽन्नंनमः बलिं समर्पया
समालभतं गंधो नमः अर्घोनमः पुष्पंनमः ॥

शिवाय सपरिवाराय नैवेद्यंनमः	१
भगवत्यै दुर्गादेव्यै नैवेद्यंनमः	२
श्रीनारायणाय नैवेद्यंनमः ॥	३
श्रीगणेशाय नैवेद्यं नमः ॥	४

राष्ट्राधिपतये ऽन्नं नमः सर्वाभयवरप्रदः
मयि प्रीतिं प्रतिपति दयात् ॥

करचरणकृतंवा०
नाथंयं त्रिभुवन०
आधीनामपदं०
तव तत्त्वं नजाना०
अज्ञानं नैव जा०
भ्याकराभ्यांजानुभ्यां
...उरसा...मन

(۱) [illegible]

(۲) [illegible]


(۳) [illegible]

(۴) [illegible]

(۵) [illegible]

(۶) [illegible]

[illegible]



This manascriph is slated to be ni the handwriting of Swami Vidhyadar ji desceple of S. Ram of Srinagar ni the leanage of Kashmir Shavism. These leaves have been written ni Saptarishi Samvat 4990 –

P. N. Raina. 3.5.2018
Lariyar, Tral
at Manorama
Boodi Jammu 02
9469173422

The booklet belongs to Mrs Jai Kishen s/o Neel Kanth ji of Tral. N. Kanth was Vidhyadar's desciple.
P. N. Raina
3.5.2018

The Organ Protecting Antihypertensive...
ON TARGET ..... 20 hours + crucial last 4 hours
Telma
(Telmisartan 20/40/80 mg tablets)
In Hypertension, Prevention of MI & Stroke